धूम+णिच्-अण्। (क्रुश) १स्थूलधूमे। ७त०स्थूलवृत्तिधूमे च

**आगुर्** स्त्री आ+गुर्-क्विप्। प्रतिज्ञायाम् "अस्य यज्ञस्यागुर उद्यचमशीय" श्रुतिः। [णमप्यत्र।

**आगुरण** न० आ+गुर-ल्युट्। उद्यमे पृ० दीर्घः आगूर-

**आगू** स्त्री आ+गम-क्विप् "ऊ च गमादीनाम्" मलोपे ऊकारादेशः प्रतिज्ञायाम्। वधूवद्रूपम्।

**आगूर्ण** त्रि०आ+गुर-क्त। १उद्यते। भावे क्त २उद्यमे न०।

**आगूर्त्त** त्रि०आ+गुर-क्त "नसत्तेत्यादिना" पा०नि० वेदे नत्वाभावः १उद्यते। भावे क्त। २उद्यमे न०।

**आगूर्त्तिन्** त्रि०आगूर्त्तमनेन इष्टा०इनि। कृतोद्यमे "आगूर्त्ती वा एष भवति यो दर्शपौर्णमासाभ्यां यजते" श्रुतिः।

**आग्नापौष्ण** त्रि० अग्निश्च पूषा च द्व०आनङ् अग्नापूषाणौ तौ देवते अस्य अण् द्विपदवृद्धिः बा०नेत्। अग्नापूषदेवताके हविरादौ। "आग्नापौष्ण, इन्द्रापौष्णः" कात्या० १५,२।

**आग्नावैष्णव** त्रि० अग्निश्च विष्णुश्च द्व०आनङ् अग्नाविष्णू तौ देवते अस्य अण् द्विपदवृद्धिः "इद्वृद्धौ" पा०इत्त्वे प्राप्ते "विष्णौ न" वार्त्ति०नेत्त्वम्। अग्नाविष्णुदेवताके हविरादौ। "अथ-श्वोभूते आग्नावैष्णवमेकादशकपालं पुरोडाशं निर्वपति" "तस्मादाग्नावैष्णव एकादशकपालः पुरोडाशो भवति" इति च शत०ब्रा०। "आग्नावैष्णव ऐन्द्रावैष्णवः" कात्या० १५,२ अग्नाविष्णुशब्दौ विद्येते यत्र विमुक्ता० अण्। अग्नावैष्णवशब्दयुक्ते २अध्याये ३अनुवाके च।

**आग्निक** त्रि०अग्नेरिदं बा०ठक्। अग्निसम्बन्धिनि। "प्रक्रतान्यौद्ग्रभणानि हुत्वा सप्ताग्निकान्याकूतिमिति" कात्या० १६,५। "हिम्स स्याल्याः स्रुवेणेत्येतदप्याग्निके भवति" कर्कधृता श्रुतिः। [दत्तसन्निकृष्टदेशादौ।

**आग्निदत्तेय** त्रि० अग्निदत्त+चतुरर्थ्यां सख्या०ढक्। अग्नि-

**आग्निपद** त्रि० अग्निपदे दीयते कार्य्यं वा व्युष्टा० अण्। अग्निस्थाने १दीयमाने २कार्य्ये वा पदार्थे।

**आग्निमारुत** त्रि० अग्निश्च मरुतश्च द्व० आनङ् अग्नामरुतौ तौ देवते अस्य अण् द्विपदवृद्धिः "इद्वृद्धौ" पा० इत्। अग्नामरुतदेवताके १शस्त्रे स्तोत्रभेदे २हविरादौ च।

**आग्निवारुण** त्रि० अग्निश्च वरुणश्च द्व० ईत् अग्नीवरुणौ तौ देवते अस्य अण् द्विपदवृद्धिः "इद्वृद्धौ" पा० इत्। अग्नीवरुणदेवताके हविरादौ।

**आग्निवेश्य** पुंस्त्री अग्निवेशस्य ऋषेरपत्यम् गर्गा० यञ्। तदृषेरपत्ये "पुरोहितञ्च कौरव्य! वेदवेदाङ्गपारगम्। आग्निवेश्यञ्च राजानम्" भा०आश्व०प०६४अ० स्त्रियां ङीप् यलोपः। आग्निवेशी तद्गोत्रजस्त्रियाम्।

**आग्निशर्म्मि** पुंस्त्री० अग्निशर्म्मणोऽपत्यं बाह्वा० इञ्। तदपत्ये ततः गोत्रे फक्। आग्निशर्म्मायणः तद्गोत्रजे पुंस्त्री०आग्निशर्म्मौ भवः गहा०छ। अग्निशर्म्मीयः तद्भवे त्रि०

**आग्निष्टोमिक** पु० अग्निष्टोमं क्रतुं वेत्ति तत्प्रतिपादकग्रन्थमधीते वा ठक्। १अग्निष्टोमयज्ञाभिज्ञे २तत्प्रतिपादकग्रन्थपाठके च। अग्निष्टोमग्रन्थस्य व्याख्यानः ग्रन्थः ठञ्। अग्निष्टोमयज्ञव्याख्याने ३ग्रन्थे ४विवृतौ स्त्री ङीप्। [अग्निष्टोमदक्षिणायाम्।

**आग्निष्टोमिकी** स्त्री० अग्निष्टोमस्य दक्षिणा ठञ् ङीप्।

**आग्नीध्र** न० अग्निमिन्धे अग्नीत् तस्य शरणम् "अग्नीधः शरणे रण् भञ्च" वार्त्ति० रण् भत्वान्न जश्। अग्नीधो-यजमानस्य स्थाने उपचारात् २ साग्निके द्विजे सि०कौ०। अग्निं धारयति धृ-मूल०क पूर्व्वपददीर्घश्च स्वार्थे अण् इति वा। साग्निके यजमाने द्विजे। "प्रति वीहि प्रस्थितं सौम्यं मधु पिबाग्नीध्रात्" ऋ० २,३६,१। अग्नीध्र+स्वार्थे अण्। २अग्नीध्रस्थाने स्त्रियां ङीप् अग्निध्री तदाधारभूमौ स्त्री। स्वार्थे गहा० छ आग्नीध्रीयः। अग्निस्थाने "गार्हपत्याद्वा अग्नीध्रीयमागच्छति" श्रुतिः आग्नीध्रस्येदम् वृद्धात् छः। आग्नीध्रसम्बन्धिनि त्रि०। "आग्नीध्रीयं प्रथमं चिनोति" श्रुतिः।

**आग्नीध्रा** स्त्री अग्नीध्रस्थानमर्हति यत्। अग्निस्थानार्हशालायाम्।

**आग्नेन्द्र** त्रि० अग्निश्च इन्द्रश्च द्व०आनङ् तौ देवते अस्य अण् "नेन्द्रस्य परस्य" इति पा० नोत्तरपदवृद्धिः वृद्ध्यभावात् नेत्। अग्नेन्द्रदेवताके हविरादौ स्त्रियां ङीप्। "या वा आग्नेन्द्र्यैन्द्राग्नी सा" श्रुतिः।

**आग्नेय** त्रि०अग्नेरिदम् अग्निर्देवता वास्य ढक्। अग्निदेवताके १हविरादौ "आग्नेयः पुरोडाशो भवति" शत०ब्रा० २अग्निसम्बन्धिनि च ३कृत्तिकानक्षत्रे न० तस्य अग्निदेवताकत्वात्तथात्वम् "आग्नेयाप्पतिदैवतेति" ज्योति०। अग्निना प्रोक्तं पुराणं ढक्। "आग्नेयं वेदसम्मितम्" इत्युक्ते अग्निप्रोक्ते महापुराणभेदे अग्निपुराणशब्दे विवृतिः ४प्रतिपदि तिथौ स्त्री तस्याः तद्देवताकत्वमुक्तं यथा "अग्निः प्रजापतिः गौरी गणेशोऽहिर्गुहोरविः। शिवोदुर्गायमोविश्वोहरिः कामोहरः शशी। पितरः प्रतिपदादीनां तिथीनामधिपाः क्रमात्"। "५स्वर्णे तस्य तद्वीर्य्यजातत्वात् तथात्वम्। अग्निरेतःशब्दे विवृतिः।